# अध्यायः ११

# विश्वरूपसंदर्शनयोगः

भगवतो विभूतय उक्ताः। तत्र च विष्टभ्याहमिदं कृत्स्नम् एकांशेन स्थितो जगत्(गी १२.४२) इति

भगवताभिहितं श्रुत्वा यद् जगदात्म-रूपमाद्यमैश्वरं तत् साक्षात्कर्त्तुमिच्छन् अर्जुन उवाच -

**अर्जुन उवाच।**

**मदनुग्रहाय परमं गुह्यम् अध्यात्मसंज्ञितम्।**

**यत्त्वयोक्तं वचस्तेन मोहोऽयं विगतो मम।। ११.१ ।।**

मदिति। **मदनुग्रहाय** ममानुग्रहार्थं **परमं** निरतिशयं **गुह्यम्** गोप्यम् **अध्यात्मसंज्ञितम्** आत्मानात्म-विवेक-

विषयम्।

**यत्त्वयोक्तं** **वचः** वाक्यं **तेन** ते वचसा **मोहोऽयं** **विगतो** **मम** अविवेक-बुद्धिरपगतेत्यर्थः।। १ ।।

किञ्च -

**भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया।**

**त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाव्ययम्।। ११.२ ।।**

भवेति। भवः उत्पत्तिः, अप्ययः प्रलयो भूतानां तौ **भवाप्ययौ** **हि** **भूतानां** **श्रुतौ** **विस्तरशो** **मया** न

संक्षेपतः **त्वत्तः** त्वत्सकाशात्।

**कमलपत्राक्ष** कमलस्य पत्रं कमल-पत्रं तद्वद् अक्षिणी यस्य तव स त्वं कमल-पत्राक्षो हे कमल-पत्राक्ष।

**माहात्म्यमपि** **च** **अव्ययम्** अक्षयं श्रुतमित्यनुवर्त्तते।। २ ।।

**एवमेतद् यथाऽऽत्थ त्वम् आत्मानं परमेश्वर।**

**द्रष्टुमिच्छामि ते रूपम् ऐश्वरं पुरुषोत्तम।। ११.३ ।।**

एवमिति। **एवमेतद्** नान्यथा **यथा** येन प्रकारेण **आत्थ** कथयसि **त्वम्** **आत्मानं** **परमेश्वर**।

तथापि **द्रष्टुमिच्छामि** **ते** तव ज्ञानैश्वर्य-शक्ति-बल-वीर्य-तेजोभिः सम्पन्नम् **ऐश्वरं** वैष्णवं **रूपं**

**पुरुषोत्तम**।। ३ ।।

**मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो।**

**योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययम्।। ११.४ ।।**

मन्यस इति। **मन्यसे** चिन्तयसि **यदि** **मया** अर्जुनेन **तच्छक्यं** **द्रष्टुमिति** **प्रभो** स्वामिन् **योगेश्वर** योगिनो योगास्तेषामीश्वरो योगेश्वरो हे योगेश्वर। यस्मादहमतीवार्थी द्रष्टुं **ततः** तस्माद् **मे** मदर्थं **दर्शय** **त्वम्** **आत्मानम्** **अव्ययम्**।। ४ ।।

एवं चोदितोऽर्जुनेन श्रीभगवानुवाच -

**श्रीभगवानुवाच।**

**पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः।**

**नानाविधानि दिव्यानि नानावर्णाकृतीनि च।। ११.५ ।।**

पश्येति। **पश्य** **मे** मम **पार्थ** **रूपाणि** **शतशोऽथ** **सहस्रशः** अनेकश इत्यर्थः।

तानि च **नानाविधानि** अनेक-प्रकाराणि। दिवि भवानि **दिव्यानि** अप्राकृतानि।

**नानावर्णाकृतीनि** **च** नाना विलक्षणा नील-पीतादि-प्रकारा वर्णास्तथा आकृतयोऽवयव-संस्थान-विशेषाः

येषां रूपाणां तानि नाना-वर्णाकृतीनि च।। ५ ।।

**पश्यादित्यान् वसून् रुद्रान् अश्विनौ मरुतस्तथा।**

**बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत।। ११.६ ।।**

पश्यादित्यान् इति। **पश्य** **आदित्यान्** द्वादश **वसून्** अष्टौ **रुद्रान्** एकादश **अश्विनौ** द्वौ **मरुत**ः सप्त सप्त

गणाः ये तान्।

**तथा** च **बहूनि** अन्यान्यपि **अदृष्टपूर्वाणि** मनुष्य-लोके त्वया त्वत्तोऽन्येन वा केनचित्।

**पश्य** **आश्चर्याणि** अद्भुतानि **भारत**।। ६ ।।

न केवलम् एतावद् एव -

**इहैकस्थं जगत्कृत्स्नं पश्याद्य सचराचरम्।**

**मम देहे गुडाकेश यच्चान्यद् द्रष्टुमिच्छसि।। ११.७ ।।**

इहेति। **इहैकस्थं** एकस्मिन् स्थितं **जगत्कृत्स्नं** समस्तं **पश्याद्य** इदानीं **सचराचरं** सह चरेणाचरेण च

वर्त्तमानं **मम** **देहे** **गुडाकेश**।

**यच्चान्यद्** जय-पराजयादि यच्छङ्कसे, यद्वा जयेम यदि वा नो जयेयुः (गी २.६) इति यदवोचः,

तदपि **द्रष्टुम्** यदि **इच्छसि**।। ७।।

किन्तु -

**न तु मां शक्यसे द्रष्टुम् अनेनैव स्वचक्षुषा।**

**दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम्।। ११.८ ।।**

नत्विति। **न** **तु** **मां** विश्व-रूप-धरं **शक्यसे** **द्रष्टुम्** **अनेनैव** प्राकृतेन **स्वचक्षुषा** स्वकीयेन चक्षुषा। येन तु शक्यसे द्रष्टुं दिव्येन तद् **दिव्यं** **ददामि** **ते** तुभ्यं **चक्षुः**। तेन **पश्य** **मे** **योगमैश्वरम्** ईश्वरस्य ममैश्वरं योगं योग-शक्त्यतिशयमित्यर्थः।। ८ ।।

**सञ्जय उवाच।**

**एवमुक्त्वा ततो राजन् महायोगेश्वरो हरिः।**

**दर्शयामास पार्थाय परमं रूपमैश्वरम्।। ११.९ ।।**

दृश् भवा प.प. णिच् + लिट्।

एवमिति। **एवं** यथोक्त-प्रकारेण **उक्त्वा** **ततः** अनन्तरं हे **राजन्** धृतराष्ट्र **महायोगेश्वरः** महान् चासौ योगेश्वरश्च **हरिः** नारायणः **दर्शयामास** दर्शितवान् **पार्थाय** पृथा-सुताय **परमं** **रूपं** विश्व-रूपम् **ऐश्वरम्**।। ९ ।।

**अनेकवक्त्रनयनम् अनेकाद्भुतदर्शनम्।**

**अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम्।। ११.१० ।।**

**दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम्।**

**सर्वाश्चर्यमयं देवमनन्तं विश्वतोमुखम्। ११.११ ।।**

दर्शयामास (णिजन्त लिट्) विश्वतोमुखम् (द्वितीया पुं एकवचनम्)

अनेकेति। **अनेकवक्त्रनयनम्** अनेकानि वक्त्राणि नयनानि च यस्मिन् रूपे तदनेक-वक्त्र-नयनम्।

**अनेकाद्भुतदर्शनम्** अनेकानि अद्भुतानि विस्मापकानि दर्शनानि यस्मिन् रूपे तदनेकाद्भुत-दर्शनम्।

तथा **अनेकदिव्याभरणम्** अनेकानि दिव्यान्याभरणानि यस्मिन् तदनेक-दिव्याभरणम्।

तथा **दिव्यानेकोद्यतायुधं** दिव्यान्यनेकान्युद्यतान्यायुधानि यस्मिन् तद्दिव्यानेकोद्यतायुधं दर्शयामासेति पूर्वेण

सम्बन्धः।। १० ।।

दिव्येति। **दिव्यमाल्याम्बरधरं** दिव्यानि माल्यानि पुष्पाण्यम्बराणि वस्त्राणि च ध्रियन्ते येनेश्वरेण तं दिव्य-

माल्याम्बर-धरम्।

**दिव्यगन्धानुलेपनं** दिव्यं गन्धानुलेपनं यस्य तं दिव्य-गन्धानुलेपनम्।

**सर्वाश्चर्यमयं** सर्वाश्चर्यप्रायं **देवम्** **अनन्तं** नास्यान्तोऽस्तीत्यनन्तः, तम्।

**विश्वतोमुखं** सर्वतो-मुखं सर्वभूतात्मत्वात्। तं दर्शयामास।

अर्जुनो ददर्शेति वा अध्याह्रियते।। ११ ।।

या पुनः भगवतः विश्वरूपस्य भाः तस्याः उपमा उच्यते -

**दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता।**

**यदि भा सदृशी सा स्याद् भासस्तस्य महात्मनः।। ११.१२ ।।**

दिवि इति। **दिवि** अन्तरिक्षे तृतीयस्यां वा दिवि।

सूर्याणां सहस्रं सूर्य-सहस्रं तस्य युगपदुत्थितस्य **सूर्यसहस्रस्य** या **युगपद् उत्थिता भाः सा यदि सदृशी** **स्यात् तस्य महात्मनः** विश्वरूपस्यैव **भासः**।

यदि वा न[1] स्यात्, ततोऽपि विश्व-रूपस्यैव भा अतिरिच्यत इत्यभिप्रायः।। १२ ।।

---

1 नेत्यस्यानन्तरं सदृशीति शेषो ज्ञेयः।

किञ्च -

**तत्रैकस्थं जगत्कृत्स्नम् प्रविभक्तमनेकधा।**

**अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा।। ११.१३ ।।**

तत्रेति। **तत्र** तस्मिन् विश्व-रूपे एकस्मिन् स्थितम् **एकस्थं** **जगत्कृत्स्नं** **प्रविभक्तमनेकधा** देव-पितृ-मनुष्यादि-भेदैः **अपश्यद्** दृष्टवान् **देवदेवस्य** हरेः **शरीरे** **पाण्डवः** अर्जुनः **तदा**।। १३ ।।

**ततः स विस्मयाविष्टो हृष्टरोमा धनञ्जयः।**

**प्रणम्य शिरसा देवं कृताञ्जलिरभाषत।। ११.१४ ।।**

तत इति। **ततः** तं दृष्ट्वा **स** विस्मयेनाविष्टः **विस्मयाविष्टः** हृष्टानि रोमाणि यस्य सोऽयं **हृष्टरोमा** चाभवद् **धनञ्जयः**।

**प्रणम्य** प्रकर्षेण नमनं कृत्वा प्रह्वीभूतस्सन् **शिरसा** **देवं** विश्व-रूप-धरं **कृताञ्जलिः** नमस्कारार्थं सम्पुटी-कृत-हस्तस्सन् **अभाषत** उक्तवान्।। १४ ।।

कथं यत्त्वया दर्शितं विश्वरूपं तदहं पश्यामि इति स्वानुभवम् आविष्कुर्वन्

**अर्जुन उवाच।**

**पश्यामि देवांस्तव देव देहे सर्वांस्तथा भूतविशेषसङ्घान्।**

**ब्रह्माणमीशं कमलासनस्थम् ऋषींश्च सर्वानुरगांश्च दिव्यान्।। ११.१५ ।**

पश्यामीति। **पश्यामि** उपलभे हे **देव** **तव** **देहे** **देवान्** **सर्वान्**। **तथा** **भूतविशेषसङ्घान्** भुत-विशेषाणां स्थावर-जङ्गमानां नाना-संस्थान-विशेषाणां सङ्घा भूत-विशेष-सङ्घास्तान्। किञ्च **ब्रह्माणं** चतुर्मुखम् **ईशम्** ईशितारं प्रजानां **कमलासनस्थं** पृथिवी-पद्म-मध्ये मेरु-कर्णिकासनस्थमित्यर्थः।

**ऋषींश्च** वसिष्ठादीन् **सर्वान्** **उरगांश्च** वासुकि-प्रभृतीन् **दिव्यान्** दिवि भवान्।। १५ ।।

**अनेकबाहूदरवक्त्रनेत्रं पश्यामि त्वा सर्वतोऽनन्तरूपम्।**

**नान्तं न मध्यं न पुनस्तवादिं पश्यामि विश्वेश्वर विश्वरूप।। ११.१६ ।।**

अनेकेति। **अनेकबाहूदरवक्त्रनेत्रं** अनेके बाहव उदराणि वक्त्राणि नेत्राणि च यस्य तव स त्वमनेक-बाहूदर-वक्त्र-नेत्रः, तमनेक-बाहूदर-वक्त्र-नेत्रं **पश्यामि** **त्वा** त्वां **सर्वतः** सर्वत्र **अनन्तरूपम्** अनन्तानि रूपाण्यस्येत्यनन्त-रूपः तमनन्तरूपम्।

**नान्तम्** अन्तः अवसानं **न** **मध्यं** मध्यं नाम द्वयोः कोट्योरन्तरं **न** **पुनस्तवादिम्**।

तव देवस्य नान्तं **पश्यामि**, न मध्यं पश्यामि, न पुनरादिं पश्यामि, हे **विश्वेश्वर** हे **विश्वरूप**।। १६ ।।

**किरीटिनं गदिनं चक्रिणं च तेजोराशिं सर्वतो दीप्तिमन्तम्।**

**पश्यामि त्वां दुर्निरीक्ष्यं समन्ताद् दीप्तानलार्कद्युतिमप्रमेयम्।। ११.१७ ।।**

किरीटिनमिति। **किरीटिनं** किरीटं नाम शिरोभूषण-विशेषः तद्यस्यास्ति स किरीटी तं किरीटिनम्।

तथा **गदिनं** गदा अस्य विद्यत इति गदी तं गदिनम्।

तथा **चक्रिणं** चक्रम् अस्यास्तीति चक्री तं चक्रिणं **च**।

**तेजोराशिं** तेजः-पुञ्जं **सर्वतोदीप्तिमन्तं** सर्वतो दीप्तिः यस्यास्ति स सर्वतो-दीप्तिमान् तं सर्वतो-दीप्तिमन्तम्।

**पश्यामि** **त्वां** **दुर्निरीक्ष्यं** दुःखेन निरीक्ष्यो दुर्निरीक्ष्यः तं दुर्निरीक्ष्यं **समन्तात्** समन्ततः सर्वत्र

**दीप्तानलार्कद्युतिम्** अनलश्चार्कश्चानलार्कौ दीप्तावनलार्कौ दीप्तानलार्कौ तयोर्दीप्तानलार्कयोर्द्युतिः इव

द्युतिस्तेजो यस्य तव स त्वं दीप्तानलार्कद्युतिस्तं त्वां दीप्तानलार्कद्युतिम् **अप्रमेयं** न प्रमेयम्, अशक्य-

परिच्छेदम् इत्यर्थः।। १७ ।।

इतः एव ते योगशक्तिदर्शनाद् अनुमिनोमि -

**त्वमक्षरं परमं वेदितव्यं त्वमस्य विश्वस्य परं निधानम्।**

**त्वमव्ययः शाश्वतधर्मगोप्ता सनातनस्त्वं पुरुषो मतो मे।। ११.१८ ।।**

त्वमिति। **त्वमक्षरं** न क्षरतीति **परमं** ब्रह्म **वेदितव्यं** ज्ञातव्यं मुमुक्षुभिः **त्वमस्य** **विश्वस्य** समस्तस्य

जगतः **परं** प्रकृष्टं **निधानं** निधीयतेऽस्मिन्निति निधानं, पर आश्रय इत्यर्थः।

किञ्च **त्वमव्ययः** न तव व्ययो विद्यते इत्यव्ययः **शाश्वतधर्मगोप्ता** शश्वद्भवः शाश्वतो नित्यो धर्मस्तस्य

गोप्ता शाश्वत-धर्म-गोप्ता।

**सनातनः** चिरन्तनः **त्वं** **पुरुषः** परः **मतः** अभिप्रेतः **मे** मम।। १८ ।।

किञ्च -

**अनादिमध्यान्तमनन्तवीर्यमनन्तबाहुं शशिसूर्यनेत्रम्।**

**पश्यामि त्वां दीप्तहुताशवक्त्रं स्वतेजसा विश्वमिदं तपन्तम्।। ११.१९ ।।**

अनादीति। **अनादिमध्यान्तम्** आदिश्च मध्यं चान्तश्च न विद्यते यस्य सोऽयम् अनादि-मध्यान्तस्तं

त्वामनादि-मध्यान्तम्। **अनन्तवीर्यं** न तव वीर्यस्यान्तोऽस्ति इत्यनन्त-वीर्यस्तं त्वामनन्त-वीर्यम्।

तथा **अनन्तबाहुम्** अनन्ता बाहवो यस्य तव स त्वमनन्त-बाहुस्तं त्वामनन्त-बाहुम्।

**शशिसूर्यनेत्रं** शशि-सूर्यौ नेत्रे यस्य तव स त्वं शशि-सूर्य-नेत्रस्तं त्वां शशि-सूर्य-नेत्रं चन्द्रादित्य-नयनम्।

**पश्यामि** **त्वां** **दीप्तहुताशवक्त्रं** दीप्तश्चासौ हुताशश्च, स वक्त्रं यस्य तव स त्वं दीप्त-हुताश-वक्त्रस्तं त्वां

दीप्त-हुताश-वक्त्रम्। **स्वतेजसा** **विश्वम्** **इदं** **तपन्तं** तापयन्तम्।। १९ ।।

**द्यावापृथिव्योरिदमन्तरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः।**

**दृष्ट्वाद्भुतं रूपमुग्रं तवेदं लोकत्रयं प्रव्यथितं महात्मन्।। ११.२० ।।**

द्यो (स्त्री) द्यौः द्यावौ द्यावः। द्याम् द्यावौ द्याः। द्यवा द्योभ्याम्..। दिव् (स्त्री) द्यौः दिवौ दिवः। दिवम् दिवौ दिवः।
दिवा द्युभ्याम्। द्युभिः। द्यौः च पृथिवी च द्यावापृथिवी। द्यावा इत्यादेशः।

द्यावापृथिव्योरिति। **द्यावापृथिव्योरिदम्** **अन्तरं** **हि** अन्तरिक्षं **व्याप्तं** **त्वयैकेन** विश्व-रूप-धरेण।

**दिशश्च** **सर्वाः** व्याप्ताः।

**दृष्ट्वा** उपलभ्य **अद्भुतं** विस्मापकं **रूपम्** **इदं** **तव** **उग्रं** क्रूरं लोकानां त्रयं **लोकत्रयं** **प्रव्यथितं** भीतं

प्रचलितं वा हे **महात्मन्** अक्षुद्र-स्वभाव।। २० ।।

अथाधुना पुरा यद्वा जयेम यदि वा नो जयेयुः (गी २.६) इत्यर्जुनस्य यः संशय आसीत् तन्निर्णयाय पाण्डव-जयमैकान्तिकं दर्शयामीति प्रवृत्तो भगवान्। तं पश्यन्नाह। किञ्च -

**अमी हि त्वा सुरसङ्घा विशन्ति केचिद्भीताः प्राञ्जलयो गृणन्ति।**

**स्वस्तीत्युक्त्वा महर्षिसिद्धसङ्घाः स्तुवन्ति त्वां स्तुतिभिः पुष्कलाभिः।।**

**११.२१ ।।**

गॄ उच्चारणे (९-वां) अमी (पुं प्र.ब.व) प्राञ्जलयः (प्रसृतौ अञ्जली)

अमीति। **अमी** **हि** युध्यमाना योद्धारः **त्वा** त्वां **सुरसङ्घा** येऽत्र भूभारावतारायावतीर्णा वस्वादि-देव-सङ्घाः मनुष्य-संस्थानाः त्वां **विशन्ति** प्रविशन्तो दृश्यन्ते। तत्र **केचिद्भीताः** **प्राञ्जलयः** सन्तो **गृणन्ति** स्तुवन्ति त्वाम्। अन्ये पलायनेऽप्यशक्ताः सन्तः। युद्धे प्रत्युपस्थिते उत्पातादि-निमित्तान्युपलक्ष्य **स्वस्ति** अस्तु जगतः **इत्युक्त्वा** **महर्षिसिद्धसङ्घाः** महर्षीणां सिद्धानां च सङ्घाः **स्तुवन्ति** **त्वां** **स्तुतिभिः** **पुष्कलाभिः** सम्पूर्णाभिः।। २१ ।।

किञ्चान्यत् -

**रुद्रादित्या वसवो ये च साध्या विश्वेऽश्विनौ मरुतश्चोष्मपाश्च।**

**गन्धर्वयक्षासुरसिद्धसङ्घा वीक्षन्ते त्वां विस्मिताश्चैव सर्वे।। ११.२२ ।।**

ऊष्मपाश्च (ऊष्म अन्नं पिबन्ति) गन्धर्वयक्षासुरसिद्धसंधाः (द्वन्द्व षष्ठी तत्पुरुषः)

रुद्रादित्या इति। **रुद्रादित्या** **वसवो** **ये** **च** **साध्याः** रुद्रादयो गणाः **विश्वे**देवा **अश्विनौ** **च** देवौ **मरुतश्च** **ऊष्मपाश्च** पितरो **गन्धर्वयक्षासुरसिद्धसङ्घा**ः गन्धर्वा हाहा-हूहू-प्रभृतयः, यक्षाः कुबेर-प्रभृतयः, असुरा विरोचन-प्रभृतयः, सिद्धाः कपिलादयः, तेषां सङ्घा गन्धर्व-यक्षासुर-सिद्ध-सङ्घाः ते **वीक्षन्ते** पश्यन्ति **त्वां** **विस्मिताः** विस्मयमापन्नाः सन्तस्त **एव** **सर्वे**।। २२ ।।

यस्मात् -

**रूपं महत्ते बहुवक्त्रनेत्रं महाबाहो बहुबाहूरुपादम्।**

**बहूदरं बहुदंष्ट्राकरालं दृष्ट्वा लोकाः प्रव्यथितास्तथाऽहम्।। ११.२३ ।।**

रूपमिति। **रूपं** **महद्** अतिप्रमाणं **ते** तव **बहुवक्त्रनेत्रं** बहूनि वक्त्राणि मुखानि नेत्राणि चक्षूंषि च यस्मिन्

तद्रूपं बहु-वक्त्र-नेत्रं हे महाबाहो।

**बहुबाहूरुपादं** बहवो बाहव ऊरवः पादाश्च यस्मिन् रूपे तद् बहु-बाहूरु-पादम्। किञ्च **बहूदरं**

बहून्युदराणि यस्मिन्निति बहूदरम्। **बहुदंष्ट्राकरालं** बह्वीभिर्दंष्ट्राभिः करालं विकृतं तद् बहु-दंष्ट्रा-करालम्।

**दृष्ट्वा** रूपमीदृशं **लोकाः** लौकिकाः प्राणिनः **प्रव्यथिताः** प्रचलिता भयेन। **तथाऽहम्** अपि।। २३ ।।

तत्र इदं कारणम् -

**नभःस्पृशं दीप्तमनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रम्।**

**दृष्ट्वा हि त्वां प्रव्यथितान्तरात्मा धृतिं न विन्दामि शमं च विष्णो।।**

**११.२४ ।।**

नभःस्पृशमिति। **नभःस्पृशं** द्युस्पर्शमित्यर्थः। **दीप्तं** प्रज्वलितम्, **अनेकवर्णम्** अनेके वर्णा भयङ्करा नाना-संस्थाना यस्मिन् त्वयि तं त्वामनेकवर्णं, **व्यात्ताननं** व्यात्तानि विवृतानि आननानि मुखानि यस्मिन् त्वयि तं त्वां व्यात्ताननं, **दीप्तविशालनेत्रं** दीप्तानि प्रज्वलितानि विशालानि विस्तीर्णानि नेत्राणि यस्मिन् त्वयि तं त्वां दीप्त-विशाल-नेत्रं, **दृष्ट्वा** **हि** **त्वां** **प्रव्यथितान्तरात्मा** प्रव्यथितः प्रभीतोऽन्तरात्मा मनो यस्य मम सोऽहं प्रव्यथितान्तरात्मा सन् **धृतिं** धैर्यं **न** **विन्दामि** न लभे **शमं** **च** उपशमं मनस्तुष्टिं हे **विष्णो**।।

२४ ।।

कस्मात् -

**दंष्ट्राकरालानि च ते मुखानि दृष्ट्वैव कालानलसंनिभानि।**

**दिशो न जाने न लभे च शर्म प्रसीद देवेश जगन्निवास।। ११.२५ ।।**

दंष्ट्राकरालानीति। **दंष्ट्राकरालानि** दंष्ट्राभिः करालानि विकृतानि **ते** तव **मुखानि** **दृष्ट्वैव** उपलभ्य

**कालानलसन्निभानि** प्रलय-काले लोकानां दाहकोऽग्निः कालानलस्तत्सन्निभानि कालानल-सन्निभानि

मुखानि दृष्ट्वेत्येतत्। **दिशः** पूर्वापर-विवेकेन **न** **जाने** दिङ्मूढो जातोऽस्मि।

अतो **न** **लभे** **च** नोपलभे च **शर्म** सुखम्। अतः **प्रसीद** प्रसन्नो भव हे **देवेश** **जगन्निवास**।। २५ ।।

येभ्यो मम पराजयशङ्का आसीत् सा च अपगता यतः -

**अमी च त्वां धृतराष्ट्रस्य पुत्राः सर्वे सहैवावनिपालसङ्घैः।**

**भीष्मो द्रोणः सूतपुत्रस्तथासौ सहास्मदीयैरपि योधमुख्यैः।। ११.२६ ।।**

अमी इति। **अमी** **च** **त्वां** **धृतराष्ट्रस्य** **पुत्राः** दुर्योधन-प्रभृतयः।

त्वरमाणा विशन्ति इति व्यवहितेन (२७) सम्बन्धः।

**सर्वे** **सहैव** संहताः **अवनिपालसङ्घैः** अवनिं पृथ्वीं पालयन्तीत्यवनि-पालास्तेषां सङ्घैः।

किञ्च **भीष्मो** **द्रोणः** **सूतपुत्रः** कर्णः **तथासौ** **सहास्मदीयैरपि** धृष्टद्युम्न-प्रभृतिभिः **योधमुख्यैः** योधानां

मुख्यैः प्रधानैः सह।। २६ ।।

किंच -

**वक्त्राणि ते त्वरमाणा विशन्ति दंष्ट्राकरालानि भयानकानि।**

**केचिद्विलग्ना दशनान्तरेषु संदृश्यन्ते चूर्णितैरुत्तमाङ्गैः।। ११.२७ ।।**

त्वरमाणाः (त्वर् १.आ.प शानच् ) विलग्नाः (विलग् १. प.प )

वक्त्रणीति। **वक्त्राणि** मुखानि **ते** तव **त्वरमाणाः** त्वरायुक्ताः सन्तः **विशन्ति**।

किं-विशिष्टानि मुखानि **दंष्ट्राकरालानि** **भयानकानि** भयङ्कराणि।

किञ्च **केचिद्** मुखानि प्रविष्टानां मध्ये **विलग्ना** **दशनान्तरेषु** दन्तान्तरेषु मांसमिव भक्षितं **संदृश्यन्ते**

उपलभ्यन्ते **चूर्णितैः** चूर्णीकृतैः **उत्तमाङ्गैः** शिरोभिः।। २७ ।।

कथं प्रविशन्ति मुखानीत्याह -

**यथा नदीनां बहवोऽम्बुवेगाः समुद्रमेवाभिमुखा द्रवन्ति।**

**तथा तवामी नरलोकवीरा विशन्ति वक्त्राण्यभिविज्वलन्ति।। ११.२८ ।।**

यथेति। **यथा** **नदीनां** स्रवन्तीनां **बहवः** अनेके, अम्बूनां वेगाः **अम्बुवेगाः** त्वरा-विशेषाः **समुद्रमेवाभिमुखाः** प्रतिमुखा **द्रवन्ति** प्रविशन्ति।

**तथा** तद्वत् **तवामी** भीष्मादयो **नरलोकवीरा** मनुष्य-लोक-शूराः **विशन्ति** **वक्त्राण्यभिविज्वलन्ति** प्रकाशमानानि।। २८।।

ते किमर्थं प्रविशन्ति कथं च इत्याह - यथा इति।

**यथा प्रदीप्तं ज्वलनं पतङ्गाः विशन्ति नाशाय समृद्धवेगाः।**

**तथैव नाशाय विशन्ति लोकाः तवापि वक्त्राणि समृद्धवेगाः।। ११.२९**

**।।**

यथेति। **यथा** **प्रदीप्तं** **ज्वलनम्** अग्निं **पतङ्गाः** पक्षिणः **विशन्ति** **नाशाय** विनाशाय **समृद्धवेगाः** समृद्ध उद्भूतो वेगो गतिर्येषां ते समृद्ध-वेगाः **तथैव** **नाशाय** **विशन्ति** **लोकाः** प्राणिनः **तवापि** **वक्त्राणि** **समृद्धवेगाः**।। २९ ।।

त्वं पुनः

**लेलिह्यसे ग्रसमानः समन्ताल्लोकान् समग्रान् वदनैर्ज्वलद्भिः।**

**तेजोभिरापूर्य जगत्समग्रं भासस्तवोग्राः प्रतपन्ति विष्णो।। ११.३० ।।**

लेलिह्यसे (यङन्तः लिह आस्वादने २. उ.प - लोढि - अतिशयेन लेढि इति म.पु.ए.व)

लेलिह्यसे इति। **लेलिह्यसे** आस्वादयसि **ग्रसमानः** अन्तः प्रवेशयन् **समन्ततः** **लोकान्** **समग्रान्**

समस्तान् **वदनैः** वक्त्रैः **ज्वलद्भिः** दीप्यमानैः **तेजोभिः** **आपूर्य** संव्याप्य **जगत्समग्रं** सहाग्रेण,

समस्तमित्येतत्।

किञ्च **भासः** दीप्तयः **तवोग्राः** क्रूराः **प्रतपन्ति** प्रतापं कुर्वन्ति हे **विष्णो** व्यापन-शील।। ३० ।।

यतः एवमुग्रस्वभावः अतः

**आख्याहि मे को भवानुग्ररूपो नमोस्तु ते देववर प्रसीद।**

**विज्ञातुमिच्छामि भवन्तमाद्यं न हि प्रजानामि तव प्रवृत्तिम्।। ११.३१ ।।**

आख्याहीति। **आख्याहि** कथय **मे** मह्यं **को** **भवानुग्ररूपः** क्रूराकारः।

**नमोस्तु** **ते** तुभ्यं हे **देववर** देवानां प्रधान। **प्रसीद** प्रसादं कुरु।

**विज्ञातुं** विशेषेण ज्ञातुम् **इच्छामि** **भवन्तम् आद्यम्** आदौ भवमाद्यम्।

**न** **हि** यस्मात् **प्रजानामि** **तव** त्वदीयां **प्रवृत्तिं** चेष्टाम्।। ३१ ।।

**श्रीभगवानुवाच -**

**कालोऽस्मि लोकक्षयकृत्प्रवृद्धः लोकान् समाहर्त्तुमिह प्रवृत्तः।**

**ऋतेऽपि त्वा न भविष्यन्ति सर्वे येऽवस्थिताः प्रत्यनीकेषु योधाः।।**

**११.३२ ।।**

कालोऽस्मीति। **कालोऽस्मि** **लोकक्षयकृत्** लोकानां क्षयं करोतीति लोक-क्षय-कृत् **प्रवृद्धः** वृद्धिं गतः।

यदर्थं प्रवृद्धस्तच्छृणु। **लोकान्** **समाहर्त्तुं** संहर्त्तुम् **इह** अस्मिन् काले **प्रवृत्तः**।

**ऋतेऽपि** विनापि **त्वा** त्वां **न** **भविष्यन्ति** भीष्म-द्रोण-कर्ण-प्रभृतयः **सर्वे** येभ्यः तव आशङ्का।

**येऽवस्थिताः** **प्रत्यनीकेषु** अनीकमनीकं प्रति प्रत्यनीकेषु प्रतिपक्ष-भूतेषु अनीकेषु **योधाः** योद्धारः।। ३२

।।

यस्मादेवम् -

**तस्मात्त्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रून्[2] भुङ्क्ष्व राज्यं समृद्धम्।**

**मयैवेते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन्।। ११.३३ ।।**

तस्मादिति। **तस्मात्त्वमुत्तिष्ठ** भीष्म-द्रोण-प्रभृतयोऽतिरथा अजेया देवैरप्यर्जुनेन जिता इति **यशो** **लभस्व**।

केवलं पुण्यैर्हि तत् प्राप्यते। **जित्वा** **शत्रून्** दुर्योधन-प्रभृतीन् **भुङ्क्ष्व** **राज्यं** **समृद्धम्** असपत्नमकण्टकम्।

**मयैवेते** **निहताः** निश्चयेन हताः प्राणैर्वियोजिताः **पूर्वमेव**।

**निमित्तमात्रं** **भव** त्वं हे **सव्यसाचिन्** सव्येन वामेनापि हस्तेन शराणां क्षेपात् सव्य-

साचीत्युच्यतेऽर्जुनः।। ३३ ।।

---

[2] जित्वा शत्रून् इति काकाक्षिन्यायेन स्थितः उभयत्र संबनधः।

**द्रोणं च भीष्मं च जयद्रथं च कर्णं तथान्यानपि योधवीरान्।**

**मया हतांस्त्वं जहि मा व्यथिष्ठाः युध्यस्व जेतासि रणे सपत्नान्।।**

**११.३४ ।।**

द्रोणं चेति। **द्रोणं** **च** येषु येषु योधेष्वर्जुनस्याशङ्का तांस्तान् व्यपदिशति भगवान् मया हतानिति ।

तत्र द्रोण-भीष्मयोः तावत् प्रसिद्धम् आशङ्का-कारणम्।

द्रोणो धनुर्वेदाचार्यो दिव्यास्त्र-सम्पन्न आत्मनश्च विशेषतो गुरुर्गरिष्ठः।

**भीष्मः** स्वच्छन्द-मृत्युः दिव्यास्त्र-सम्पन्नश्च परशुरामेण द्वन्द्व-युद्धमगमत्, न च पराजितः।

तथा **जयद्रथो** यस्य पिता तपश्चरति मम पुत्रस्य शिरो भूमौ पातयिष्यति यस्तस्यापि शिरः पतिष्यतीति।

**कर्णः** अपि वासव-दत्तया शक्त्या त्वमोघया सम्पन्नः सूर्यपुत्रः कानीनो यतोऽतस्तन्नाम्नैव निर्देशः।

**मया** **हतांस्त्वं** **जहि** निमित्त-मात्रेण। **मा** **व्यथिष्ठाः** तेभ्यो भयं मा कार्षीः।

**युध्यस्व** **जेतासि** दुर्योधन-प्रभृतीन् **रणे** युद्धे **सपत्नान्** शत्रून्।। ३४ ।।

**सञ्जय उवाच।**

**एतच्छ्रुत्वा वचनं केशवस्य कृताञ्जलिर्वेपमानः किरीटी।**

**नमस्कृत्वा भूय एवाह कृष्णं सगद्गदं भीतभीतः प्रणम्य।। ११.३५ ।।**

एतच्छ्रुत्वेति। **एतच्छ्रुत्वा** **वचनं** **केशवस्य** पूर्वोक्तं **कृताञ्जलिः** सन् **वेपमानः** कम्पमानः **किरीटी** **नमस्कृत्वा** **भूयः** पुनः **एवाह** उक्तवान् **कृष्णं** **सगद्गदं** भयाविष्टस्य दुःखाभिघातात्, स्नेहाविष्टस्य च हर्षोद्भवाद्, अश्रुपूर्ण-नेत्रत्वे सति श्लेष्मणा कण्ठावरोधः। ततश्च वाचः अपाटवं मन्द-शब्दत्वं यत् स गद्गदः। तेन सह वर्त्तते इति सगद्गदं वचनम्। आहेति वचन-क्रिया-विशेषणमेतत्। **भीतभीतः** पुनः पुनर्भयाविष्ट-चेताः सन् **प्रणम्य** प्रह्वीभूत्वा। आह इति व्यवहितेन सम्बन्धः।

अत्रावसरे सञ्जय-वचनं साभिप्रायम्। कथम् द्रोणादिष्वर्जुनेन निहतेष्वजेयेषु चतुर्षु निराश्रयः दुर्योधनः निहत एवेति मत्वा धृतराष्ट्रो जयं प्रति निराशः सन् सन्धिं करिष्यति, ततः शान्तिरुभयेषां भविष्यति इति। तदपि नाश्रौषीद् धृतराष्ट्रो भवितव्य-वशात्।। ३५ ।।

**अर्जुन उवाच।**

**स्थाने हृषीकेश तव प्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यते च।**

**रक्षांसि भीतानि दिशो द्रवन्ति सर्वे नमस्यन्ति च सिद्धसङ्घाः।।११.३६।।**

स्थाने इति। **स्थाने** युक्तम्। किं तत् **तव** **प्रकीर्त्या** त्वन्माहात्म्य-कीर्त्तनेन श्रुतेन हे **हृषीकेश** यत् **जगत्** **प्रहृष्यति** प्रहर्षमुपैति तत्स्थाने, तद्युक्तमित्यर्थः। अथवा विषय-विशेषणं स्थाने इति। युक्तो हर्षादि-विषयो भगवान्। यत ईश्वरः सर्वात्मा सर्वभूत-सुहृच्चेति। तथा **अनुरज्यते** अनुरागं चोपैति। तच्च विषये इति व्याख्येयम्।

किञ्च **रक्षांसि** **भीतानि** भयाविष्टानि **दिशो** **द्रवन्ति** गच्छन्ति तच्च स्थाने विषये।

**सर्वे** **नमस्यन्ति** नमस्कुर्वन्ति **च** **सिद्धसङ्घाः** सिद्धानां समुदायः कपिलादीनां तच्च स्थाने।। ३६ ।।

भगवतो हर्षादिविषयत्वे हेतुं दर्शयति -

**कस्माच्च ते न नमेरन्महात्मन् गरीयसे ब्रह्मणोऽप्यादिकर्त्रे।**

**अनन्त देवेश जगन्निवास त्वमक्षरं सदसत्तत्परं यत्।। ११.३७ ।।**

कस्माच्चेति। **कस्माच्च** हेतोः **ते** तुभ्यं **न** **नमेरन्** न नमस्कुर्युः हे **महात्मन्**। **गरीयसे** गुरुतराय यतो **ब्रह्मणः** हिरण्य-गर्भस्य **अपि** आदि-कर्ता कारणमतस्तस्माद् **आदिकर्त्रे** कथं एते न नमस्कुर्युः। अतो हर्षादीनां नमस्कारस्य च स्थाने। त्वम् अर्हो विषय इत्यर्थः। हे **अनन्त** **देवेश** **जगन्निवास** **त्वमक्षरं** **तत्** **परं** **यद्** वेदान्तेषु श्रूयते। किं तत् **सदसद्** इति। सद्विद्यमानम् असच्च यत्र नास्तीति बुद्धिः। ते उपधान-भूते[3] सदसती यस्याक्षरस्य यद्द्वारेण सदसदीत्युपचर्यते। परमार्थतस्तु सदसतोः परं तदक्षरम्। यदक्षरं वेदविदो वदन्ति तत्त्वमेव[4] नान्यदित्यभिप्रायः।। ३७ ।।

---

[3] उपाधिभूते।

[4] यत् सदसत्, यच्च तत्परं, तदक्षरं त्वमेव इत्यन्वयः।

पुनरपि स्तौति -

**त्वमादिदेवः पुरुषः पुराणः त्वमस्य विश्वस्य परं निधानम्।**

**वेत्तासि वेद्यं च परं च धाम त्वया ततं विश्वमनन्तरूप।। ११.३८ ।।**

त्वमिति। **त्वमादिदेवः** जगतः स्रष्टृत्वात् **पुरुषः** पुरि शयनात् **पुराणः** चिरन्तनः **त्वम्** एव **अस्य** **विश्वस्य** **परं** प्रकृष्टं **निधानं** निधीयते अस्मिन् जगत् सर्वं महा-प्रलयादौ इति।

किञ्च **वेत्तासि** वेदितासि सर्वस्यैव वेद्य-जातस्य। यच्च **वेद्यं** वेदनार्हं तच्चासि।

**परं** **च** **धाम** परमं पदं वैष्णवम्। **त्वया** **ततं** व्याप्तं **विश्वं** समस्तम्।

हे **अनन्तरूप** अन्तो न विद्यते तव रूपाणाम्।। ३८ ।।

किञ्च -

**वायुर्यमोग्निर्वरुणः शशाङ्कः प्रजापतिस्त्वं प्रपितामहश्च।**

**नमो नमस्तेऽस्तु सहस्रकृत्वः पुनश्च भूयोऽपि नमो नमस्ते।।११.३९ ।।**

वायुरिति। **वायुः** त्वं **यमः** च **अग्निः** **वरुणः** अपां पतिः **शशाङ्कः** चन्द्रमाः **प्रजापतिः** **त्वं** कश्यपादिः

**प्रपितामहश्च** पितामहस्यापि पिता प्रपितामहो ब्रह्मणोऽपि पितेत्यर्थः।

**नमो** **नमस्ते** तुभ्यम् **अस्तु** **सहस्रकृत्वः**। **पुनश्च** **भूयोऽपि** **नमो** **नमस्ते**।

बहुशो नमस्कार-क्रियाभ्यासावृत्ति-गणनं कृत्वसुचोच्यते।

पुनश्च, भूयोऽपीति श्रद्धा-भक्त्यतिशयाद् अपरितोषमात्मनो दर्शयति।। ३९ ।।

तथा -

**नमः पुरस्तादथ पृष्ठतस्ते नमोऽस्तु ते सर्वत एव सर्व।**

**अनन्तवीर्यामितविक्रमस्त्वं सर्वं समाप्नोषि ततोऽसि सर्वः।। ११.४० ।।**

नम इति। **नमः** **पुरस्तात्** पूर्वस्यां दिशि तुभ्यम् **अथ** **पृष्ठतस्ते** पृष्ठतोऽपि च ते। **नमोऽस्तु** **ते** **सर्वत** **एव** सर्वासु दिक्षु सर्वत्र स्थिताय हे **सर्व**। **अनन्तवीर्यामितविक्रमः** अनन्तं वीर्यं अस्यामितो विक्रमोऽस्य। वीर्यं सामर्थ्यं विक्रमः पराक्रमः। वीर्यवानपि कश्चित् शस्त्रादि-विषये[5] न पराक्रमते, मन्द-पराक्रमो वा। त्वं त्वनन्त-वीर्यः, अमित-विक्रमश्च इत्यनन्त-वीर्यामित-विक्रमः।

**सर्वं** समस्तं जगत् **समाप्नोषि** सम्यगेकेनात्मना व्याप्नोषि यतः **ततः** तस्माद् **असि** भवसि **सर्वः**। त्वया विना भूतं न किञ्चिदस्तीत्यर्थः।। ४० ।।

[5] शत्रुवधादिविषये इति वा।

यतः अहं त्वन्माहात्म्यापरिज्ञानापराधी अतः

**सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे सखेति[६]।**

**अजानता महिमानं तवेदं मया प्रमादात् प्रणयेन वापि[७]।। ११.४१ ।।**

सखेति। **सखा** समान-वया इति **मत्वा** ज्ञात्वा विपरीत-बुद्ध्या **प्रसभम्** अभिभूय प्रसह्य **यदुक्तं** **हे** **कृष्ण** **हे** **यादव** **हे** **सखे** **इति** च **अजानता** अज्ञानिना मूढेन। किमजानता इत्याह - **महिमानं** माहात्म्यं **तवेदम्** ईश्वरस्य विश्व-रूपम्। तवेदं महिमानमजानता इति वैयधिकरण्येन सम्बन्धः[८]। तवेममिति पाठो यद्यस्ति तदा सामानाधिकरण्यमेव। **मया** **प्रमादाद्** विक्षिप्त-चित्ततया **प्रणयेन** **वापि** प्रणयो नाम स्नेह-निमित्तः विश्रम्भः तेनापि कारणेन यदुक्तवानस्मि।। ४१ ।।

---

6 आर्षसन्धिः।

7 उक्तवान् अहमस्मि इति शेषः।

8 इदमित्यस्य महिमानमित्यस्य च लिङ्गव्यत्ययात् न सामानाधिकरण्यम्।

**यच्चावहासार्थमसत्कृतोऽसि विहारशय्यासनभोजनेषु।**

**एकोऽथवाप्यच्युत तत्समक्षं तत्क्षामये त्वामहमप्रमेयम्।। ११.४२ ।।**

यच्चेति। **यच्चावहासार्थं** परिहास-प्रयोजनाय **असत्कृतः** परिभूतः **असि** भवसि।

क्व **विहारशय्यासनभोजनेषु** विहरणं विहारः पादव्यायामः, शयनं शय्या, आसनमास्थायिका,

भोजनमदनम् इत्येतेषु विहार-शय्यासन-भोजनेषु।

**एकः** परोक्षः सन्नसत्कृतोऽसि परिभूतोऽसि **अथवापि** हे **अच्युत** **तत्समक्षं** तच्छब्दः क्रिया-विशेषणार्थः

प्रत्यक्षं वाऽसत्कृतोऽसि **तत्** सर्वमपराध-जातं **क्षामये** क्षमां कारये।

**त्वाम्** **अहम्** **अप्रमेयं** प्रमाणातीतं क्षमस्व इति प्रार्थये इत्यर्थः।। ४२ ।।

यतस्त्वम् -

**पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान्।**

**न त्वत्समोऽस्त्यभ्यधिकः कुतोन्यो लोकत्रयेऽप्यप्रतिमप्रभाव।।११.४३ ।।**

अभ्यधिकः (अभितः अधिकः प्रादिसमासः) निरतिशयप्रभाव (नञ् बहुव्रीहि)

पितासीति। **पितासि** जनयितासि **लोकस्य** प्राणि-जातस्य **चराचरस्य** स्थावर-जङ्गमस्य।

न केवलं **त्वमस्य** जगतः पिता, **पूज्यश्च** पूजार्हः यतो **गुरुर्गरीयान्** गुरुतरः।

कस्माद् गुरुतरस्त्वमित्याह - **न** च **त्वत्समः** त्वत्तुल्योऽन्यः **अस्ति**। न हीश्वर-द्वयं सम्भवति।

अनेकेश्वरत्वे व्यवहारानुपपत्तेः। त्वत्सम एव तावदन्यो न सम्भवति, **कुतः** एव **अन्योऽभ्यधिकः** स्यात्।

**लोकत्रयेऽपि** सर्वस्मिन् **अप्रतिमप्रभाव** प्रतिमीयते यया सा प्रतिमा, न विद्यते प्रतिमा यस्य तव प्रभावस्य स त्वमप्रतिम-प्रभावः हेऽप्रतिम-प्रभाव निरतिशय-प्रभावेत्यर्थः।। ४३ ।।

यत एवम् -

**तस्मात् प्रणम्य प्रणिधाय कायं प्रसादये त्वामहमीशमीड्यम्।**

**पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायार्हसि देव सोढुम्।। ११.४४ ।।**

तस्मादिति। **तस्मात् प्रणम्य** नमस्कृत्य **प्रणिधाय** प्रकर्षेण नीचैः धृत्वा **कायं** शरीरं **प्रसादये** प्रसादं कारये **त्वामहम् ईशम्** ईशितारम् **ईड्यं** स्तुत्यम्।

त्वं पुनः **पुत्रस्य** अपराधं **पिता** यथा क्षमते सर्वं, **सखेव** च **सख्युः** अपराधं, यथा वा **प्रियः प्रियायाः** अपराधं क्षमते एवम् **अर्हसि** हे **देव सोढुं** प्रसहितुं क्षन्तुमित्यर्थः।। ४४ ।।

**अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा भयेन च प्रव्यथितं मनो मे।**

**तदेव मे दर्शय देव रूपं प्रसीद देवेश जगन्निवास।। ११.४५ ।।**

अदृष्टपूर्वमिति। **अदृष्टपूर्वं** न कदाचिदपि दृष्ट-पूर्वमिदं विश्व-रूपं तव मयाऽन्यैर्वा तदहं **दृष्ट्वा** **हृषितोऽस्मि**। **भयेन** **च** **प्रव्यथितं** **मनो** **मे**। अतः **तदेव** **मे** मम **दर्शय** हे **देव** **रूपं** यद् मत्सखम्। **प्रसीद** **देवेश** **जगन्निवास** जगतो निवासो जगन्निवासो हे जगन्निवास।। ४५ ।।

**किरीटिनं गदिनं चक्रहस्तमिच्छामि त्वां द्रष्टुमहं तथैव।**

**तेनैव रूपेण चतुर्भुजेन सहस्रबाहो भव विश्वमूर्त्ते।। ११.४६ ।।**

चक्रहस्तम् (चक्रः हस्ते यस्य)

किरीटिनमिति। **किरीटिनं** किरीटवन्तं तथा **गदिनं** गदावन्तं **चक्रहस्तम्** **इच्छामि** त्वां प्रार्थये **त्वां** **द्रष्टुमहं** **तथैव** पूर्ववदित्यर्थः।

यत एवं तस्मात् **तेनैव** **रूपेण** वसुदेव-पुत्र-रूपेण **चतुर्भुजेन**[9], **सहस्रबाहो** वार्त्तमानिकेन विश्वरूपेण, **भव** **विश्वमूर्त्ते**।

उपसंहत्य विश्व-रूपं तेनैव रूपेण वसुदेव-पुत्र-रूपेण भवेत्यर्थः।। ४६ ।।

[9] एतेन सर्वदा चतुर्भुजादिरूपं अर्जुनेन भगवतो दृश्यत इत्युक्तम्। (मधुसूदनी)

अर्जुनं भीतमुपलभ्य उपसंहृत्य विश्वरूपं प्रियवचनेन आश्वासयन् -

**श्रीभगवानुवाच।**

**मया प्रसन्नेन तवार्जुनेदं रूपं परं दर्शितमात्मयोगात्।**

**तेजोमयं विश्वमनन्तमाद्यं यन्मे त्वदन्येन न दृष्टपूर्वम्।। ११.४७ ।।**

मयेति। **मया** **प्रसन्नेन** प्रसादो नाम त्वय्यनुग्रह-बुद्धिः तद्वता प्रसन्नेन मया **तव** हे **अर्जुन** **इदं** **परं** **रूपं**

विश्व-रूपं **दर्शितमात्मयोगाद्** आत्मन ऐश्वर्यस्य सामर्थ्यात्।

**तेजोमयं** तेजः-प्रायं **विश्वं** समस्तम् **अनन्तम्** अन्त-रहितम्, आदौ भवम् **आद्यं** **यद्** रूपं **मे** मम

**त्वदन्येन** त्वत्तोऽन्येन केनचिद् **न** **दृष्टपूर्वम्**।। ४७ ।।

आत्मनो मम रूपदर्शनेन कृतार्थः एव त्वं संवृत्तः इति तत् स्तौति -

**न वेदयज्ञाध्ययनैर्न दानैर्न च क्रियाभिर्न तपोभिरुग्रैः।**

**एवंरूपः शक्य[१०] अहं नृलोके द्रष्टुं त्वदन्येन कुरुप्रवीर।। ११.४८ ।।**

न वेदेति। **न** **वेदयज्ञाध्ययनैर्न** **दानैः** चतुर्णामपि वेदानामध्ययनैर्यथावद् यज्ञाध्ययनैश्च।

वेदाध्ययनैरेव यज्ञाध्ययनस्य सिद्धत्वात् पृथग् यज्ञाध्ययन-ग्रहणं यज्ञ-विज्ञानोप-लक्षणार्थम्।

तथा न दानैः तुला-पुरुषादिभिः। **न** **च** **क्रियाभिः** अग्निहोत्रादिभिः श्रैतादिभिः।

**न** अपि **तपोभिरुग्रैः** चान्द्रायणादिभिरुग्रैर्घोरैः। **एवंरूपः** यथा-दर्शितं विश्व-रूपं यस्य सोऽहमेवं-रूपः।

न **शक्योऽहं** **नृलोके** मनुष्य-लोके **द्रष्टुं** **त्वदन्येन** त्वत्तोऽन्येन **कुरुप्रवीर**।। ४८ ।।

---

10 आर्षसन्धिः।

**मा ते व्यथा मा च विमूढभावो दृष्ट्वा रूपं घोरमीदृङ् ममेदम्।**

**व्यपेतभीः प्रीतमनाः पुनस्त्वं तदेव मे रूपमिदं प्रपश्य।। ११.४९ ।।**

मा ते व्यथेति। **मा** **ते** **व्यथा** मा भूत् ते भयम्। **मा** **च** **विमूढभावो** विमुढ-चित्तता।

**दृष्ट्वा** उपलभ्य **रूपं** **घोरमीदृङ्** यथा-दर्शितं **ममेदं** **व्यपेतभीः** विगत-भयः **प्रीतमनाः** च सन् **पुनः** भूयः

**त्वं** **तदेव** चतुर्भुजं शङ्ख-चक्र-गदा-धरं तवेष्टं **रूपम्** इदं प्रपश्य।। ४९।।

**सञ्जय उवाच।**

**इत्यर्जुनं वासुदेवस्तथोक्त्वा स्वकं रूपं दर्शयामास भूयः।**

**आश्वासयामास च भीतमेनं भूत्वा पुनः सौम्यवपुर्महात्मा।। ११.५० ।।**

इत्यर्जुनमिति। **इति** एवं **अर्जुनं** **वासुदेवः** **तथा**-भूतं वचनम् **उक्त्वा** **स्वकं** वसुदेव-गृहे जातं **रूपं**

**दर्शयामास** दर्शितवान् **भूयः** पुनः।

**आश्वासयामास** **च** आश्वासितवांश्च **भीतमेनं** **भूत्वा** **पुनः** **सौम्यवपुः** प्रसन्न-देहो **महात्मा**।। ५० ।।

**अर्जुन उवाच।**

**दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन।**

**इदानीमस्मि संवृत्तः सचेताः प्रकृतिं गतः।। ११.५१ ।।**

दृष्ट्वेदमिति। **दृष्ट्वेदं** **मानुषं** **रूपं** मत्सखं प्रसन्नं **तव** **सौम्यं** **जनार्दन**।

**इदानीम्** अधुना **अस्मि** **संवृत्त**ः सञ्जातः। किम् **सचेताः** प्रसन्न-चित्तः **प्रकृतिं** स्वभावं **गतः** चास्मि।।

५१ ।।

**श्रीभगवानुवाच।**

**सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम।**

**देवा अप्यस्य रूपस्य नित्यं दर्शनकाङ्क्षिणः।। ११.५२ ।।**

कांक्षिणः (कांक्ष् + णिनि ६.३)

सुदुर्दर्शमिति। **सुदुर्दर्शं** सुष्ठु दुःखेन दर्शनमस्येति सुदुर्दर्शम् **इदं** **रूपं** **दृष्टवानसि** **यन्मम**।

**देवा** **अप्यस्य** मम **रूपस्य** **नित्यं** सर्वदा **दर्शनकाङ्क्षिणः**।

दर्शनेप्सवोऽपि न त्वमिव दृष्टवन्तो न द्रक्ष्यन्ति चेत्यभिप्रायः।। ५२ ।।

कस्मात् -

**नाहं वेदैर्न तपसा न दानेन न चेज्यया।**

**शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा।। ११.५३ ।।**

इज्यया (यज् + क्यप्)

नाहमिति। **नाहं** **वेदैः** ऋग्यजुस्सामाथर्व-वेदैश्चतुर्भिरपि **न** **तपसा** उग्रेण चान्द्रायणादिना **न** **दानेन** गो-भू-हिरण्यादिना **न** **चेज्यया** यज्ञेन पूजया वा **शक्य** **एवंविधो** यथा-दर्शित-प्रकारो **द्रष्टुं** **दृष्टवानसि** **मां** **यथा** त्वम्।। ५३ ।।

कथं पुनः शक्य इत्युच्यते -

**भक्त्या त्वनन्यया शक्य[११] अहमेवंविधोऽर्जुन।**

**ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप।। ११.५४ ।।**

भक्त्येति। भक्त्या तु। किं-विशिष्टया इत्याह - **अनन्यया** अपृथग्भूतया भगवतोऽन्यत्र पृथग् न कदाचिदपि या भवति सा त्वनन्या भक्तिः।

सर्वैरपि करणैर्वासुदेवाद् अन्यन्नोपलभ्यते यया साऽनन्या भक्तिः।

तया भक्त्या **शक्योऽहमेवंविधः** **विश्वरूपप्रकारः** हे **अर्जुन** **ज्ञातुं** शास्त्रतः।

न केवलं ज्ञातुं शास्त्रतः **द्रष्टुं** **च** साक्षात्कर्त्तुं **तत्त्वेन** तत्त्वतः। **प्रवेष्टुं** **च** मोक्षं गन्तुं च **परन्तप**।। ५४ ।।

---

11 आर्षसन्धिः।

अधुना सर्वस्य गीताशास्त्रस्य सारभूतः अर्थः निःश्रेयसार्थः अनुष्ठेयत्वेन समुच्चित्य उच्यते -

**मत्कर्मकृत् मत्परमः मद्भक्तः सङ्गवर्जितः।**

**निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव।। ११.५५ ।।**

मत्कर्मेति। **मत्कर्मकृत्** मदर्थं कर्म मत्कर्म तत्करोतीति मत्कर्म-कृत्।

**मत्परमः** करोति भृत्यः स्वामि-कर्म, न त्वात्मनः परमा प्रेत्य गन्तव्या गतिः इति स्वामिनं प्रतिपद्यते।

अयं तु मत्कर्म-कृत् मामेव परमां गतिं प्रतिपद्यत इति मत्परमः। अहं परमः परा गतिर्यस्य सोऽयं

मत्परमः। तथा **मद्भक्तः** मामेव सर्व-प्रकारैः सर्वात्मना सर्वोत्साहेन भजत इति मद्भक्तः।

**सङ्गवर्जितः** धन-पुत्र-मित्र-कलत्र-बन्धु-वर्गेषु सङ्ग-वर्जितः सङ्गः प्रीतिः स्नेहः तद्वर्जितः।

**निर्वैरः** निर्गत-वैरः **सर्वभूतेषु** शत्रु-भाव-रहितः, आत्मनोऽत्यन्तापकार-प्रवृत्तेषु अपि।

**यः** ईदृशो मद्भक्तः **स** **मामेति**। अहमेव तस्य परा गतिर्नान्या गतिः काचिद्भवति।

अयं तवोपदेश इष्टो मयोपदिष्टो हे **पाण्डव** इति।। ५५ ।।

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां
योगशास्त्रे श्रीकृष्णार्जुनसंवादे विश्वरूपसंदर्शनयोगो नाम एकादशोऽध्यायः।।

# अध्यायः १२

# भक्तियोगः

**अवतरणिकाभाष्यम्**

द्वितीय-प्रभृतिषु विभूत्यन्तेष्वध्यायेषु परमात्मनो ब्रह्मणोऽक्षरस्य विध्वस्त-सर्व-विशेषणस्य [१२]

उपासनमुक्तम्।

सर्व-योगैश्वर्य-सर्व-ज्ञान-शक्तिमत्सत्त्वोपाधेरीश्वरस्य तव चोपासनं तत्र तत्रोक्तम्।

विश्व-रूपाध्याये तु ऐश्वरमाद्यं समस्त-जगदात्म-रूपं विश्व-रूपं त्वदीयं दर्शितमुपासनार्थमेव त्वया।

तच्च दर्शयित्वोक्तवानसि मत्कर्मकृत् (गी ११.५५) इत्यादि।

अतोऽहमनयोरुभयोः पक्षयोर्विशिष्टतर-बुभुत्सया त्वां पृच्छामीति -

---

[12] सर्वोपाधिविशेषस्य इति पाठान्तरम्।

**अर्जुन उवाच।**

**एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते।**

**ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः।। १२.१ ।।**

एवमिति। **एवम्** इत्यतीतानन्तर-श्लोकेनोक्तमर्थं परामृशति मत्कर्मकृत् इत्यादिना।

एवं **सततयुक्ताः** नैरन्तर्येण भगवत्कर्मादौ यथोक्तेऽर्थे समाहिताः सन्तः प्रवृत्ता इत्यर्थः।

**ये** **भक्ताः** अनन्य-शरणाः सन्तः **त्वां** यथा-दर्शितं विश्व-रूपं **पर्युपासते** ध्यायन्ति।

**ये** **च** अन्ये **अपि** त्यक्त-सर्वैषणाः संन्यस्त-सर्व-कर्माणो यथा-विशेषितं ब्रह्म **अक्षरं** निरस्त-सर्वोपाधित्वाद् **अव्यक्तम्** अकरण-गोचरम्। यद्धि लोके करण-गोचरं तद्व्यक्तम् उच्यते अञ्जेर्धातोस्तत्कर्मकत्वात्। इदं त्वक्षरं तद्विपरीतं शिष्टैश्चोच्यमानैर्विशेषणैर्विशिष्टम्। तद्ये चापि पर्युपासते।

**तेषाम्** उभयेषां मध्ये **के** **योगवित्तमाः** के अतिशयेन योगविद इत्यर्थः।। १ ।।

ये त्वक्षरोपासकाः सम्यग्दर्शिनो निवृत्तैषणास्ते तावत्तिष्ठन्तु। तान्प्रति यद्वक्तव्यं तदुपरिष्टाद् वक्ष्यामः।

ये त्वितरे -

**श्रीभगवानुवाच -**

**मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते**

**श्रद्धया परयोपेतास्ते मे युक्तमा मताः।। १२.२ ।।**

ये परया श्रद्धया उपेताः मयि मनः आवेश्य नित्ययुक्ताः मां उपासते ते युक्ततमाः मे मताः।। २ ।।

मयीति। **मयि** विश्व-रूपे परमेश्वरे **आवेश्य** समाधाय **मनः**, **ये** भक्ताः सन्तः **मां** सर्वयोगेश्वराणामधीश्वरं सर्वज्ञं विमुक्त-रागादि-क्लेश-तिमिर-दृष्टिं **नित्ययुक्ताः** अतीतानन्तराध्यायान्तोक्त-श्लोकार्थ-न्यायेन सतत-युक्ताः सन्तः **उपासते** **श्रद्धया** **परया** प्रकृष्टया **उपेताः** **ते** **मे** मम **मताः** अभिप्रेता **युक्ततमाः** इति।

नैरन्तर्येण हि ते मच्चित्ततया अहोरात्रमतिवाहयन्ति। अतो युक्तं तान्प्रति युक्ततमा इति वक्तुम्।। २ ।।

किमितरे युक्ततमा न भवन्ति न। किन्तु तान्प्रति यद्वक्तव्यं तच्छृणु -

**ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते।**

**सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम्।। १२.३ ।।**

येत्विति। **ये** **त्वक्षरम्** **अनिर्देश्यम्** अव्यक्तत्वादशब्द-गोचरमिति न निर्देष्टुं शक्यते इत्यनिर्देश्यम् **अव्यक्तं** न केनापि प्रमाणेन व्यज्यते इत्यव्यक्तं **पर्युपासते** परि समन्ताद् उपासते।

उपासनं नाम यथा-शास्त्रम् उपास्यस्यार्थस्य विषयीकरणेन सामीप्यमुपगम्य तैल-धारावत् समान-प्रत्यय-प्रवाहेण दीर्घ-कालं यदासनं तदुपासनमाचक्षते।

अक्षरस्य विशेषणमाह उपास्यस्य - **सर्वत्रगं** व्योमवद्व्यापी।

**अचिन्त्यं च** अव्यक्तत्वादचिन्त्यम्। यद्धि करण-गोचरं तन्मनसाऽपि चिन्त्यं तद्विपरीतत्वादचिन्त्यमक्षरम्।

**कूटस्थं** दृश्यमान-गुणमन्तर्दोषं वस्तु कूटम्। कूट-रूपम् कूट-साक्ष्यम् इत्यादौ कूट-शब्दः प्रसिद्धो लोके।

तथा च अविद्याद्यनेक-संसार-बीजम् अन्तर्दोषवद् मायाव्याकृतादि-शब्द-वाच्यतया मायां तु प्रकृतिं

विद्यान्मायिनं तु महेश्वरम् (श्वे ४.२०) मम माया दुरत्यया (गी ७.१४) इत्यादौ प्रसिद्धं यत्तत् कूटम्।

तस्मिन् कूटे स्थितं कूटस्थं तदध्यक्षतया।

अथवा राशिः इव स्थितं कूटस्थम्।

अत एव **अचलम्**। यस्मादचलं तस्माद् **ध्रुवं** नित्यम् इत्यर्थः।। ३ ।।

तेषां फलमाह -

**सन्नियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः।**

**ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः।। १२.४ ।।**

संनियम्येति। **सन्नियम्य** सम्यङ् नियम्य संहृत्य **इन्द्रियग्रामम्** इन्द्रिय-समुदायं **सर्वत्र** सर्वस्मिन्काले **समबुद्धयः** समा तुल्या बुद्धिर्येषामिष्टानिष्ट-प्रप्तौ ते सम-बुद्धयः।

**ते** ये एवं-विधास्ते **प्राप्नुवन्ति** **मामेव** **सर्वभूतहिते** **रताः**।

न तु तेषां वक्तव्यं किञ्चिद् मां ते प्राप्नुवन्ति इति। ज्ञानी त्वात्मैव मे मतम् (गी ७.१८) इति ह्युक्तम्।

न हि भगवत्स्वरूपाणां सतां युक्ततमत्वमयुक्ततमत्वं वा वाच्यम्।। ४ ।।

किन्तु -

**क्लेशोऽधिकतरस्तेषाम् अव्यक्तासक्तचेतसाम्।**

**अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते।। १२.५ ।।**

अव्यक्तासक्तचेतसां तेषाम् अधिकतरः क्लेशः (भवति इति शेषः)। हि अव्यक्ता गतिः देहवद्भिः दुःखम् अवाप्यते।। ५ ।।

क्लेश इति। **क्लेशः** **अधिकतरः** यद्यपि मत्कर्मादि-पराणां क्लेशोऽधिक एव क्लेशोऽधिकतरः त्वक्षरात्मनां

परमार्थ-दर्शिनां देहाभिमान-परित्याग-निमित्तः।

**अव्यक्तासक्तचेतसाम्** अव्यक्ते आसक्तं चेतो येषां तेऽव्यक्तासक्त-चेतसः तेषाम् अव्यक्तासक्त-चेतसाम्।

**अव्यक्ता** **हि** यस्माद् या **गतिः** अक्षरात्मिका **दुःखं** सा **देहवद्भिः** देहाभिमानवद्भिः **अवाप्यते** अतः

क्लेशोऽधिकतरः। अक्षरोपासकानां यद्वर्त्तनं तदुपरिष्टाद् वक्ष्यामः।। ५ ।।

**ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः।**

**अनन्येनैव योगेन मां ध्यायन्त उपासते।। १२.६ ।।**

येत्विति। **ये** **तु** **सर्वाणि** **कर्माणि** **मयि** ईश्वरे **संन्यस्य** **मत्पराः** अहं परो येषां ते मत्पराः सन्तः

**अनन्येनैव** अविद्यमानमन्यदालम्बनं विश्व-रूपं देवमात्मानं मुक्त्वा यस्य सोऽनन्यः।

तेन अनन्येनैव केवलेन। केन **योगेन** समाधिना **मां** **ध्यायन्तः** चिन्तयन्तः **उपासते**।। ६ ।।

तेषां किम् -

**तेषामहं समुद्धर्ता मृत्युसंसारसागरात्।**

**भवामि न चिरात्पार्थ मय्यावेशितचेतसाम्।। १२.७ ।।**

पार्थ मय्यावेशितचेतसां तेषाम् मृत्युसंसारसागरात् नचिरात् अहं समुद्धर्ता भवामि ।। ७ ।।

तेषामिति। **तेषां** मदुपासनैकपराणाम् **अहम्** ईश्वरः **समुद्धर्ता**। कुत इत्याह - **मृत्युसंसारसागराद्** मृत्यु-युक्तः संसारो मृत्यु-संसारः, स एव सागर इव सागरो दुस्तरत्वात्[१३], तस्माद् मृत्यु-संसार-सागराद् अहं तेषां समुद्धर्ता **भवामि**। **न** **चिरात्**। किं तर्हि क्षिप्रमेव। हे **पार्थ** **मय्यावेशितचेतसां** मयि विश्व-रूपे आवेशितं प्रवेशितं समाहितं चेतो येषां ते मय्यावेशित-चेतसः तेषाम्।। ७ ।।

13 दुरुत्तरत्वादिति पाठान्तरम्।

यत एवं तस्मात् -

**मय्येव मन आधत्स्व मयि बुद्धिं निवेशय।**

**निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः।। १२.८ ।।**

मय्येवेति। **मय्येव** विश्व-रूपे ईश्वरे **मनः** सङ्कल्प-विकल्पात्मकं **आधत्स्व** स्थापय।

**मयि** एवाध्यवसायं कुर्वतीं **बुद्धिम्** आधत्स्व **निवेशय**।

ततस्ते किं स्यादिति श्रृणु - **निवसिष्यसि** निवत्स्यसि निश्चयेन मदात्मना **मयि** निवासं करिष्यसि **एव**

**अतः** शरीरपाताद् **ऊर्ध्वम्**।

**न संशयः** संशयोऽत्र न कर्त्तव्यः।। ८ ।।

**अथ चित्तं समाधात्तुं न शक्नोषि मयि स्थिरम्।**

**अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय।। १२.९ ।।**

अथ (त्वं) चित्तं मयि स्थिरं (यथा तथा) समाधात्तुं न शक्नोषि (चेत्) हे धनञ्जय ततो माम् अभ्यासयोगेन आप्तुम् इच्छ ।। ९।।

अथेति। **अथ** एवं यथाऽवोचाम तथा **मयि** **चित्तं** **समाधात्तुं** स्थापयितुं **स्थिरम्** अचलं **न** **शक्नोषि** चेत्

**ततः** पश्चात् **अभ्यासयोगेन** चित्तस्यैकस्मिन्नालम्बने सर्वतः समाहृत्य पुनः पुनः स्थापनमभ्यासः।

तत्पूर्वको योगः समाधान-लक्षणः, तेन अभ्यास-योगेन।

**मां** विश्व-रूपम् **इच्छ** प्रार्थयस्व **आप्तुं** प्राप्तुं हे **धनञ्जय।**। ९ ।।

**अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव।**

**मदर्थमपि कर्माणि कुर्वन् सिद्धिमवाप्स्यसि।। १२.१० ।।**

अभ्यासेऽपीति। **अभ्यासेऽपि** **असमर्थोऽसि** अशक्तोऽसि तर्हि **मत्कर्मपरमः** **भव** मदर्थं कर्म मत्कर्म

तत्परमो मत्कर्म-परमो मत्कर्म-प्रधान इत्यर्थः।

अभ्यासेन विना **मदर्थमपि** **कर्माणि** केवलं **कुर्वन्** **सिद्धिं** सत्व-शुद्धि-योग-ज्ञान-प्राप्ति-द्वारेण

**अवाप्स्यसि**।। १० ।।

**अथैतदप्यशक्तोऽसि कर्त्तुं मद्योगमाश्रितः।**

**सर्वकर्मफलत्यागं ततः कुरु यतात्मवान्।। १२.११ ।।**

अथ एतदपि कर्त्तुं अशक्तोऽसि यदि तर्हि ततः यतात्मवान् मद्योगमाश्रितः सन सर्वकर्मफलत्यागं कुरु ।। ११।।

अथैतदिति। **अथ** पुनः **एतदपि** यदुक्तं मत्कर्म-परमत्वं तत् **कर्त्तुमशक्तोऽसि** यदि, **मद्योगमाश्रितः** मयि क्रियमाणानि कर्माणि संन्यस्य यत्करणं तेषामनुष्ठानं स मद्योगः तमाश्रितः सन् **सर्वकर्मफलत्यागं** सर्वेषां कर्मणां फल-संन्यासं सर्व-कर्म-फल-त्यागं **ततः** अनन्तरं **कुरु** **यतात्मवान्** संयत-चित्तः सन्नित्यर्थः।। ११ ।।

इदानीं सर्वकर्मफलत्यागं स्तौति -

**श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते।**

**ध्यानात्कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम्।। १२.१२ ।।**

श्रेय इति। **श्रेयो** **हि** प्रशस्यतरं **ज्ञानम्**। कस्मात् अविवेक-पूर्वकाद् **अभ्यासात्**।

तस्मादपि **ज्ञानाद्** ज्ञान-पूर्वकं **ध्यानं** **विशिष्यते**। ज्ञानवतो **ध्यानाद्** अपि **कर्मफलत्यागः** विशिष्यते इत्यनुषज्यते।

एवं कर्मफल-**त्यागात्** पूर्व-विशेषणवतः[१४] **शान्तिः** उपशमः सहेतुकस्य संसारस्य **अनन्तरम्** एव स्यान्न तु कालान्तरमपेक्षते।।

14 ध्यानोत्कृष्टत्वरूपविशेषणयुक्तात्।

अज्ञस्य कर्मणि प्रवृत्तस्य पूर्वोपदिष्टोपायानुष्ठानाशक्तौ सर्व-कर्मणां फल-त्यागः श्रेयः-साधनमुपदिष्टं, न प्रथममेव। अतश्च श्रेयो हि ज्ञानमभ्यासात् इत्याद्युत्तरोत्तर-विशिष्टत्वोपदेशेन सर्व-कर्म-फल-त्यागः स्तूयते संपन्न-साधनानुष्ठानाशक्तौ अनुष्ठेयत्वेन श्रुतत्वात्। केन साधर्म्येण स्तुतित्वम् यदा सर्वे प्रमुच्यन्ते (कठ. २.३.१४) इति सर्व-काम-प्रहाणादमृतत्वमुक्तं तत्प्रसिद्धम्। कामाश्च सर्वे श्रौत-स्मार्त्त-सर्व-कर्मणां फलानि। तत्त्यागे च विदुषो ज्ञान-निष्ठस्यानन्तरैव शान्तिरिति सर्व-काम-त्याग-सामान्यम् अज्ञ-कर्म-फल-त्यागस्यास्तीति तत्सामान्यात् सर्व-कर्म-फल-त्याग-स्तुतिरियं, प्ररोचनार्था। यथा अगस्त्येन ब्राह्मणेन समुद्रः पीतः इति इदानींतना अपि ब्राह्मणा ब्राह्मणत्व-सामान्यात् स्तूयन्ते। एवं कर्म-फल-त्यागात् कर्म-योगस्य श्रेयः-साधनत्वमभिहितम्।। १२ ।।

**अवतरणिकाभाष्यम्**

अत्र च आत्मेश्वर-भेदमाश्रित्य विश्व-रूप ईश्वरे चेतः-समाधान-लक्षणो योग उक्तः, ईश्वरार्थं कर्मानुष्ठानादि च। अथैतदप्यशक्तोऽसि (गी १२.११) इत्यज्ञान-कार्य-सूचनाद्[१५] नाभेद-दर्शिनः अक्षरोपासकस्य कर्मयोगः उपपद्यत इति दर्शयति। तथा कर्म-योगिनोऽक्षरोपासनानुपपत्तिं दर्शयति भगवान्। ते प्राप्नुवन्ति मामेव (गी १२.४) इति  अक्षरोपासकानां कैवल्य-प्राप्तौ स्वातन्त्र्यमुक्त्वा इतरेषां पारतन्त्र्यमीश्वराधीनतां दर्शितवान् तेषामहं समुद्धर्त्ता (गी १२.७) इति। यदि हीश्वरस्य आत्म-भूताः ते मता अभेद-दर्शित्वात्, अक्षर-रूपा एव ते इति समुद्धरण-कर्म-वचनं तान्प्रत्यपेशलं[१६] स्यात्।

15 अशक्तिः हि अज्ञानकार्यम्।

16 असुन्दरम्, अयुक्तम्।

यस्माच्चार्जुनस्यात्यन्तमेव हितैषी भगवांस्तस्य सम्यग्दर्शनानन्वितं कर्मयोगं भेददृष्टिमन्तम् एवोपदिशति।

न चात्मानमीश्वरं प्रमाणतो बुद्ध्वा कस्यचिद् गुणभावं जिगमिषति कश्चित्, विरोधात्।

तस्माद् अक्षरोपासकानां सम्यग्दर्शन-निष्ठानां संन्यासिनां त्यक्त-सर्वैषणानाम् अद्वेष्टा सर्वभूतानाम्

इत्यादि-धर्म-पूगं साक्षादमृतत्व-कारणं वक्ष्यामीति प्रवर्त्तते -

**अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च।**

**निर्ममो निरहङ्कारः समदुःखसुखः क्षमी।। १२.१३ ।।**

अद्वेष्टा इति। **अद्वेष्टा सर्वभूतानां** सर्वेषां भूतानां न द्वेष्टा आत्मनो दुखः-हेतुमपि न किञ्चिद् द्वेष्टि,

सर्वाणि भूतान्यात्मत्वेन हि पश्यति।

**मैत्रः** मित्र-भावो मैत्री मित्रतया वर्त्तते इति मैत्रः।

**करुण** **एव** **च** करुणा कृपा दुःखितेषु दया तद्वान् करुणः। सर्वभूताभय-प्रदः संन्यासीत्यर्थः।

**निर्ममो** मम-प्रत्यय-वर्जितः। **निरहङ्कारः** निर्गताहं-प्रत्ययः।

**समदुःख-सुखः** समे दुःख-सुखे द्वेष-रागयोरप्रवर्त्तके यस्य सः सम-दुःख-सुखः।

**क्षमी** क्षमावान् आक्रुष्टः अभिहतो वा अविक्रिय एवाऽऽस्ते।। १३ ।।

**सन्तुष्टस्सततं योगी यतात्मा दृढनिश्चयः।**

**मय्यर्पितमनोबुद्धिर्यो मद्भक्तस्स मे प्रियः।। १२.१४ ।।**

सन्तुष्ट इति। **सन्तुष्टस्सततं** नित्यं देह-स्थिति-कारणस्य लाभेऽलाभे चोत्पन्नालं-प्रत्ययः तथा गुणवल्लाभे तद्विपर्यये च सन्तुष्टः। सततं **योगी** समाहित-चित्तः। **यतात्मा** संयत-स्वभावः। **दृढनिश्चयः** दृढः स्थिरो निश्चयोऽध्यवसायो यस्याऽऽत्म-तत्त्व-विषये स दृढ-निश्चयः। **मय्यर्पितमनोबुद्धिः** सङ्कल्प-विकल्पात्मकं मनः। अध्यवसाय-लक्षणा बुद्धिः। ते मय्येवार्पिते स्थापिते यस्य संन्यासिनः सः मय्यर्पित-मनो-बुद्धिः। **यः** ईदृशो **मद्भक्तः** **स** **मे** **प्रियः**। प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः (गी ७.१७) इति सप्तमेऽध्याये सूचितं तदिह प्रपञ्च्यते।। १४।।

**यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः।**

**हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः।। १२.१५ ।।**

यस्मादिति। **यस्मात्** संन्यासिनः **नोद्विजते** नोद्वेगं गच्छति न सन्तप्यते न संक्षुभ्यते लोकः।

तथा **लोकाद्** **नोद्विजते** **च** **यः**।

**हर्षामर्षभयोद्वेगैः** हर्षश्चामर्षश्च भयं चोद्वेगश्च तैः हर्षामर्ष-भयोद्वेगैर्मुक्तः। हर्षः प्रिय-लाभेऽन्तःकरणस्योत्कर्षः रोमाञ्चनाश्रु-पातादि-लिङ्गः।

अमर्षोऽभिलषित-प्रतिघातेऽसहिष्णुता। भयं त्रासः। उद्वेग उद्विग्नता। तैः **मुक्तः** **यः** **स** **च** **मे** **प्रियः**।।

१५ ।।

**अनपेक्षः शुचिर्दक्षः उदासीनो गतव्यथः।**

**सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः।। १२.१६ ।।**

अनपेक्ष इति। **अनपेक्षः** देहेन्द्रिय-विषय-सम्बन्धादिष्वपेक्षा-विषयेष्वनपेक्षो निस्पृहः **शुचिः** बाह्येनाभ्यन्तरेण च शौचेन सम्पन्नः।

**दक्षः** प्रत्युत्पन्नेषु कार्येषु सद्यो यथावत्प्रतिपत्तुं समर्थः **उदासीनः** न कस्यचिद् मित्रादेः पक्षं भजते यः सः उदासीनो यतिः **गतव्यथः** गत-भयः **सर्वारम्भपरित्यागी** आरभ्यन्ते इत्यारम्भाः, इहामुत्र-फल-भोगार्थानि कामहेतूनि कर्माणि सर्वारम्भाः, तान्परित्यक्तुं शीलमस्येति सर्वारम्भ-परित्यागी **यो** **मद्भक्तः** **स** **मे** **प्रियः**।। १६ ।।

किञ्च -

**यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति।**

**शुभाशुभपरित्यागी भक्तिमान् यः स मे प्रियः।। १२.१७ ।।**

य इति। **यो** **न** **हृष्यति** इष्ट-प्राप्तौ, **न** **द्वेष्टि** अनिष्ट-प्राप्तौ, **न** **शोचति** प्रिय-वियोगे, **न** चाप्राप्तं **कांक्षति**।

**शुभाशुभपरित्यागी** शुभाशुभे कर्मणी परित्यक्तुं शीलमस्येति शुभाशुभ-परित्यागी **भक्तिमान्** **यः** **स** **मे** **प्रियः**।। १७ ।।

**समश्शत्रौ च मित्रे च तथा मानापमानयोः।**

**शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः।। १२.१८ ।।**

सम इति। **समः शत्रौ च मित्रे च**, **तथा मानापमानयोः** पूजा-परिभवयोः **शीतोष्ण-सुखदुःखेषु समः**

सर्वत्र च **सङ्गविवर्जित**ः।। १८ ।।

किञ्च -

**तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित्।**

**अनिकेतः स्थिरमतिर्भक्तिमान् मे प्रियो नरः।। १२.१९ ।।**

तुल्येति। **तुल्यनिन्दास्तुतिः** निन्दा च स्तुतिश्च निन्दा-स्तुती ते तुल्ये यस्य स तुल्य-निन्दा-स्तुतिः **मौनी** मौनवान् संयतवाक् **सन्तुष्टो** **येन** **केनचित्** शरीर-स्थिति-हेतु-मात्रेण। तथा चोक्तम् - येन केनचिदाच्छन्नो येन केनचिदाशितः। यत्र क्वचन शायी स्यात्तं देवा ब्राह्मणं विदुः (म.भा.शा. २४५.१२) इति।

किञ्च **अनिकेतः** निकेत आश्रयो निवासो नियतो न विद्यते यस्य सोऽनिकेतः नागारे[१७].. इत्यादि-स्मृत्यन्तरात्। **स्थिरमतिः** स्थिरा परमार्थ-वस्तु-विषया मतिर्यस्य सः स्थिर-मतिः **भक्तिमान्** **मे** **प्रियो** **नरः**।। १९ ।।

---

[17] अनगारे इति पाठान्तरम्। अगारं (नं) गृहम्। न कुड्यां नोदके सङ्गो न चैले न त्रिपुष्करे। नागारे नाऽऽसने नान्ने यस्य वै मोक्षवित्तु सः।।

अद्वेष्टा सर्वभूतानाम् (गी १२.१३) इत्यादिना अक्षरोपासकानां निवृत्तसर्वैषणानां संन्यासिनां परमार्थज्ञाननिष्ठानां धर्मजातं प्रक्रान्तम् उपसंह्रियते -

**ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते।**

**श्रद्दधाना मत्परमाः भक्तास्तेऽतीव मे प्रियाः।। १२.२० ।।**

ये तु श्रद्दधाना मत्परमाः (च सन्तः) इदं यथोक्तं धर्म्यामृतं पर्युपासते। ते भक्ताः मे अतीव प्रियाः।।२०।।

येत्विति। **ये** **तु** संन्यासिनः **धर्म्यामृतमिदं** धर्मादनपेतं धर्म्यं च तदमृतं च तदमृतत्व-हेतुत्वाद् इदं **यथोक्तम्** अद्वेष्टा सर्वभूतानाम् (गी १२.१३) इत्यादिना **पर्युपासते** अनुतिष्ठन्ति **श्रद्दधानाः** सन्तः **मत्परमाः** यथोक्तोऽहमक्षरात्मा परमो निरतिशया गतिर्येषां ते मत्परमाः मद्-**भक्ताः** चोत्तमां परमार्थ-ज्ञान-लक्षणां भक्तिमाश्रिताः **ते** **अतीव** **मे** **प्रियाः**।

प्रियो हि ज्ञानिनोत्यर्थम् (गी ७.१७) इति यत्सूचितं तद् व्याख्यायेह उपसंहृतं भक्तास्तेऽतीव मे प्रिया:इति।

यस्माद् धर्म्यामृतमिदं यथोक्तमनुतिष्ठन् भगवतो विष्णोः परमेश्वरस्य मेऽतीव प्रियो भवति तस्मादिदं धर्म्यामृतं मुमुक्षुणा यत्नतोऽनुष्ठेयं विष्णोः प्रियं परं धाम जिगमिषुणेति वाक्यार्थः।। २० ।।

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां
योगशास्त्रे श्रीकृष्णार्जुनसंवादे भक्तियोगो नाम द्वादशोऽध्यायः।।